संस्कृत ४२७

याज्ञिक

प्रयोग - स्मार्त

क्र.नं. १५८

ऋषिन्यास

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

॥श्रीगणेशायनमः॥अथलघुन्यासप्रारंभ॥प्रजननेब्रह्मातिष्ठ
तु॥पादयोर्विष्णुस्तिष्ठतु॥हस्तयोर्हरस्तिष्ठतु॥बाह्वोरिंद्रस्तिष्ठतु॥
जठरेअग्निस्तिष्ठतु॥हृदयेशिवस्तिष्ठतु॥कंठेवसवस्तिष्ठतु॥
वक्त्रेसरस्वतीतिष्ठतु॥नासिकयोर्वायुस्तिष्ठतु॥नैनयोःसूर्याचं य
द्रमसौतिष्ठतां॥सर्वतोवायुस्तिष्ठतु॥ततोबहिःसर्वतोग्निर्ज्वा
लामालापरिवृताःस्तिष्ठंतु॥सर्वेष्वंगेषुसर्वादेवतायथायथ
स्थानानितिष्ठंतु॥माःरक्षंतु॥यजमानःरक्षंतु॥अग्निर्मेवा
चिश्रितः॥वाक्हृदये॥हृदयंमयि॥अहममृते॥अमृतंब्रह्मणि १
॥वायुर्मेप्राणेश्रितः॥प्राणोहृदये॥हृदयंमयि॥अहममृते॥
अमृतंब्रह्मणि॥सूर्योमेचक्षुषिश्रितः॥चक्षुर्हृदये॥हृदयं

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(1A)

मयि॥अहममृते॥अमृतंब्रह्मणि॥चंद्रमामेमनसिश्रिताः॥
मनोहृदये॥हृदयंमयि॥अहममृते॥अमृतंब्रह्मणि॥दिशोमे
श्रोत्रेश्रिताः॥श्रोत्रंहृदये॥हृदयंमयि॥अहममृते॥अमृत
ब्रह्मणि॥आपोमेरेतसिश्रिताः॥रेतोहृदये॥हृदयंमयि॥अ
हममृते॥अमृतंब्रह्मणि॥पृथिवीमेशरीरेश्रिता॥शरीरंहृ
म दये॥हृदयंमयि॥अहममृते॥अमृतंब्रह्मणि॥ओषधिवनस्प
तयोमेलोमसुश्रिताः॥लोमानिहृदये॥हृदयंमयि॥अहममृ
ते॥अमृतंब्रह्मणि॥इंद्रोमेबलेश्रितः॥बलंहृदये॥हृदयं
मयि॥अहममृते॥अमृतंब्रह्मणि॥पर्जन्योमेमूर्ध्निश्रितः॥
मूर्धाहृदये॥हृदयंमयि॥अहममृते॥अमृतंब्रह्मणि॥ईशा

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2)

लघु. नोमेमन्यौश्रितः॥मन्युर्हृदये॥हृदयंमयि॥अहममृते॥अमृतं
२ ब्रह्मणि॥आत्मामआत्मनिश्रितः॥आत्माहृदये॥हृदयंमयि॥अ
हममृते॥अमृतंब्रह्मणि॥पुनर्मआत्मापुनरायुरागात्॥पुनःप्राण
पुनराकूतमागात्॥वैश्वानरोरश्मिभिर्वावृधानः॥अंतस्तिष्ठत्व
मृतस्यगोपाः॥अथात्मानंशिवात्मानंश्रीरुद्ररूपंध्यायेत्॥शुद्ध
स्फटिकसंकाशंत्रिनेत्रंपंचवक्त्रकं॥गंगाधरंदशभुजंसर्वाभरण
भूषितं॥नीलग्रीवंशशांकांकनागयज्ञोपवीतिनं॥व्याघ्रचर्मोत्त
रीयंचवरेण्यमभयप्रदं॥कमंडल्वक्षसूत्राभ्यामन्वितंशूलपाणि
नं॥ऽमृतेनाप्लुतंहृष्टमुमादेहार्धधारिणं॥दिव्यसिंहासनासी २
नंदिव्यभोगसमन्वितं॥नित्यंचशाश्वतंशुद्धंध्रुवमक्षरमव्ययं॥

ज्वलंतंपिंगलजटाशिखामुद्योतकारिणं॥वृ॰॥
दिग्देवतासमायुक्तंसुरासुरनमस्कृतं॥व॰॥

A joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai

(2A)

सर्वव्यापिनमीशानं रुद्रं वै विश्वरूपिणं॥ एवं ध्यात्वा द्विजः स
म्यक् कुतस्तोयजनमारभेत्॥ आराधितो मनुष्यैस्त्वं सुद्देर्देवाःसुरादिभिः॥
आराधयामि भक्त्या त्वां मां प्राणमहेश्वर॥ आत्वाव हंतु हरयः सचेतसः श्वे
तैरश्वैः सह केतुमद्भिः॥ वालाजवैर्बलवद्भिर्मनोजवेयायायाहि शीघ्रं मम हव्याय
शर्वे॥ स्वामिं सर्वजगन्नाथ यावत्सजास्पृवसानकं॥ तावत्त्वं प्रीतिभावेन लिंगे
स्मिन्संनिधो भव॥ अव्यांतो भव॥ सुमुखो भव॥ मम सन्मुखो वरदो भव॥ २५

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com